# Appendix - 08

## *Bruhannāradiya Purāṇa* on Hayagrivopāsanā

**सनत्कुमार उवाच ॥**

प्रवणो हृदयं विष्णुर्नेन्तः सुरपतिस्तथा।
महाबलाय स्वाहान्तो मन्त्रो वसुधराक्षरः ॥१॥
मुनिरिन्दुर्विराट् छन्दो देवता दधिवामनः।
तारो बीजं तथा शक्तिर्वह्निजाया प्रकीर्तिता ॥२॥
चन्द्राक्षिरामबाणेषु नेत्रसंख्यैर्मनूद्भवैः।
वर्णैः षडङ्गं कृत्वा च मूर्ध्नि भाले च नेत्रयोः ॥३॥
कर्णयोर्घ्राणयोरोष्ठतालुकण्ठभुजेषु च।
पृष्ठे हृद्युदरे नाभौ गुह्ये चोरुस्थले पुनः ॥४॥
जानुद्वयं जङ्घयोश्च पादयोर्विन्यसेत्क्रमात्।
अष्टादशैव मन्त्रोत्थास्ततो देवं विचिन्तयेत् ॥५॥
मुक्तागौरं रत्नभूषं चन्द्रस्थं भृङ्गसन्निभैः।
अलकैर्विलसद्वक्त्रं कुम्भं शुद्धाम्बुपूरितम् ॥६॥
दध्यन्नपूर्णचषकं दोर्भ्यां संदधतं भजेत्।
लक्षत्रयं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ॥७॥
पायसान्नैः प्रजुहुयाद्दध्यन्नेन यथाविधि।
चन्द्रान्ते कल्पिते पीठे पूर्वोक्ते पूजयेच्च तम् ॥८॥
संकल्पमूर्तिमूलेन संपूज्य च विधानतः।
केसरेषु षडङ्गानि सम्पूज्य दिग्दलेषु च ॥९॥
वासुदेवं संकर्षणं प्रद्युम्नमनिरुद्धकम्।
कोणपत्रेषु शान्तिं च श्रियं सरस्वतीं रतिम् ॥१०॥
ध्वजं च वैनतेयं च कौस्तुभं वनमालिकम्।
शंखं चक्रं गदां शार्ङ्गं दलेष्वष्टसु पूजयेत् ॥११॥
दलाग्रेषु केशवादीन्दिक्पालांस्तदनन्तरम्।
तदस्त्राणि च सम्पूज्य गजानष्टौ समर्चयेत् ॥१२॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽजनः।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥१३॥

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात्।
ताम्रकर्णी शुभ्रदन्ती चाङ्गना ह्यञ्जना वती ॥१४॥
एवमाराधितो मन्त्री दद्यादिष्टानि मन्त्रिणे।
श्रीकामः पायसाज्येन सहस्रं जुहुयात्सुधीः ॥१५॥
महतीं श्रियमाप्नोति धान्याप्तिर्धान्य होमतः।
शतपुष्पासमुत्थैश्च बीजैर्हुत्वा सहस्रतः ॥१६॥
महाभयं नाशयेद्धि नात्र कार्या विचारणा।
दद्ध्योदनेन शुद्धेन हुत्वा मुच्यते दुर्गतिः ॥१७॥
ध्यात्वा त्रैविक्रमं रूपं जपेन्मन्त्रं समाहितः।
कारागृहाद्भवेन्मुक्तो बद्धो मंत्रप्रभावतः ॥१८॥
भित्तौ सम्पाद्य देवेशं फलके वा प्रपूजयेत्।
नित्यं सुगन्धकुसुमैर्महतीं श्रियमाप्नुयात् ॥१९॥
हुत्वा रक्तोत्पलैर्मन्त्री वशयेत्सकलं जगत्।
अन्नाज्यैर्जुहुयान्नित्यमष्टाविंशतिसंख्यया ॥२०॥
सिताज्यान्नं च विधिवत्प्राप्नुयादन्नमक्षयम्।
अपूपैः षड्रसोपेतैर्हुनेद्वसुसहस्रकम् ॥२१॥
अलक्ष्मीं च पराभूय महतीं श्रियमाप्नुयात्।
जुहुयादयुतं मन्त्री दध्यन्नं च सितान्वितम् ॥२२॥
यत्र यत्र वसेत्सोऽपि तत्रान्नगिरिमाप्नुयात्।
पद्माक्षरैर्युतं बिल्वांतिकस्थो जुहुयान्नरः ॥२३॥
महालक्ष्मीं स लभते तत्र तत्र न संशयः।
जुहुयात्पायसैर्लक्षं वाचस्पतिसमो भवेत् ॥२४॥
लक्षं जप्त्वा तद्दशांशं पुत्रजीवफलैर्हुनेत्।
तत्काष्ठैरेधिते वह्नौ श्रेष्ठं पुत्रमवाप्नुयात् ॥२५॥
ससाध्यतारं विलसत्कर्णिकं च सुवर्णकैः।
विलसत्केसरं मन्त्राक्षरद्वन्द्वाष्टपत्रकम् ॥२६॥
शेषयुग्माणर्त्यपत्रं द्वादशाक्षरवेष्टितम्।
तद्बहिर्मातृकावर्णैर्यंत्रं सम्पत्प्रदं नृणाम् ॥२७॥
रक्तं त्रिविक्रमं ध्यात्वा प्रसूनै रक्तवर्णकैः।
जुहुयादयुतं मन्त्री सर्वत्र विजयी भवेत् ॥२८॥
ध्यायेच्चन्द्रासनगतं पद्मानामयुतं हुनेत्।
लभेदकण्टकं राज्यं सर्वलक्षणसंयुतम् ॥२९॥

हुत्वा लवंगैर्मध्वाक्तैरपामार्गदलैस्तु वा।
अयुतं साध्यना माढ्यं स वश्यो जायते ध्रुवम् ॥३०॥
अष्टोत्तरशतं हुत्वा ह्यपामार्गदलैः शुभैः।
तावज्जप्त्वा च सप्ताहान्महारोगात्प्रमुच्यते ॥३१॥
उहिरत्पदमाभाष्य प्रणवोद्गीय शब्दतः।
सर्ववागीश्वरेत्यंते प्रवदेदीश्वरेत्यथा ॥३२॥
सर्ववेदमयाचिंत्यपदान्ते सर्वमीरयेत्।
बोधयद्वितवांतोऽयं मन्त्रस्तारादिरीरितः ॥३३॥
ऋषिर्ब्रह्मास्य निर्दिष्टश्छन्दोऽनुष्टुवुदाहृतम्।
देवता स्याद्धयग्रीवो वागैश्वर्यप्रदो विभुः ॥३४॥
तारेण पादैर्मन्त्रस्य पञ्चांगानि प्रकल्पयेत्।
तुषाराद्रिसमच्छायं तुलसीदामभूषितम् ॥३५॥
तुरंगवदनं वंदे तुंगसारस्वतः पदम्।
ध्यात्वैवं प्रजपेन्मंत्रमयुतं तद्दशांशतः ॥३६॥
मध्वक्तैः पायसैर्हुत्वा विमलादिसमन्विते।
पूजयेद्वैष्णवे पीठे मूर्तिं संकल्प्य मूलतः ॥३७॥
कर्णिकायां चुतर्दिक्षु यजेत्पूर्वादितः क्रमात्।
सनंदनं च सनकं श्रियं च पृथिवीं तथा ॥३८॥
तद्बहिर्दिक्षु वेदाश्च षट्कोणेषु ततोऽर्चयेत्।
निरुक्तं ज्योतिषं पश्चाद्यजेद्व्याकरणं ततः ॥३९॥
कल्पं शिक्षां च छंदांसि वेदांगानि त्विमानि वै।
ततोऽष्टदलमूले तु मातरोऽष्टौ समर्चयेत् ॥४०॥
वक्रतुंडादिकानष्टौ दलमध्ये प्रपूजयेत्।
दलाग्रेष्वर्चयेत्पश्चात्साधकश्चाष्टभैरवान् ॥४१॥
असिताङ्गं रुरुं चैव भीषणं रक्तनेत्रकम्।
बटुकं कालदमनं दंतुरं विकटं तथा ॥४२॥
तद्बहिः षोडशदलेष्ववतारान्हरेर्दश।
शंखं चक्रं गदां पद्मं नंदकं शार्ङ्गमेव च ॥४३॥
तद्बहिर्भूगृहे शक्रमुखान्दश दिगीश्वरान्।
वज्राद्यांस्तद्बहिश्चेष्ट्वा द्वारेषु च ततः क्रमात् ॥४४॥
महागणपतिं दुर्गां क्षेत्रेशं बटुकं तथा।
समस्तप्रकटाद्याश्च योगिन्यस्तद्बहिर्भवेत् ॥४५॥

तद्बहिः सप्त नद्यश्च तद्बाह्ये तु ग्रहान्नव।
तद्बाह्ये पर्वतानष्टौ नक्षत्राणि च तद्बहिः ॥४६॥
एवं पंचदशावृत्त्या संपूज्य तुरगाननम्।
वागीश्वरसमो वाचि धनैर्धनपतिर्भवेत् ॥४७॥
एवं सिद्धे मनौ मन्त्री प्रयोगान्कर्तुमर्हति।
अष्टोत्तरसहस्रं तु शुद्धं वार्यभिमन्त्रितम् ॥४८॥
बीजेन मासमात्रं यः पिबेद्धीमान् जितेन्द्रियः।
जन्ममूकोऽपि स नरो वाक्सिद्धिं लभते ध्रुवम् ॥४९॥
वियद्भृगुस्थमर्धीराबिन्दुमद्बीजमीरितम्।
चन्द्रसूर्योपरागे तु पात्रे रुक्ममये क्षिपेत् ॥५०॥
दुग्धं वचां ततो मन्त्री कण्ठमात्रोदके स्थितः।
स्पर्शाद्विमोक्षपर्यंतं प्रजपेन्मन्त्रमादरात् ॥५१॥
पिबेत्तत्सर्वमचिरात्तस्य सारस्वतं भवेत्।
ज्योतिष्मतीलताबीजं दिनेष्वेकैकवर्द्धितम् ॥५२॥
अष्टोत्तरशतं यावद्भक्षयेदभिमन्त्रितम्।
सरस्वत्यक्तारोऽसौ सत्यं स्याद्भुवि मानवः ॥५३॥
किं बहूक्तेन विप्रेन्द्र मनोरस्य प्रसादतः।
सर्ववेदागमादीनां व्याख्याता ज्ञानवान् भवेत् ॥५४॥

**इति श्रीबृहन्नारदीयपुराणे पूर्वभागे बृहदुपाख्याने सनत्कुमारविभागे तृतीयपादे हयग्रीवोपासनानिरूपणं नाम द्विसप्ततितमोऽध्यायः ॥७२॥**

♦♦♦♦♦♦♦♦♦♦♦♦♦♦♦♦♦♦